# संस्कृत-वार्ता:

इयम् आकाशवाणी

सम्प्रति: वार्ताः श्रूयन्ताम्

दिनाङ्कः-01.04.2025 सायम् - 06:20

आदौ-मुख्यवार्ता:

- प्रधानमन्त्री श्रीनरेन्द्रमोदी नवदिल्ल्यां चिली-देशस्य राष्ट्रपतिना गैब्रियल् बोरिक् फोण्ट् इत्यनेन सह द्विपक्षीय-संवादं समाचरितवान्; विविधक्षेत्रेषु अनेकेषु सन्धिपत्रेषु च हस्ताक्षरं कृतवान्।
- लोकसभा चतुर्विंशत्यधिक-द्विसहस्रतम-वर्षस्य वक्फ्-संशोधन-विधेयके विचारं करिष्यति, अथ च श्वः इदं पारितं भविष्यति।
- राष्ट्रपतिः द्रौपदी मुर्मुः भारतम् आङ्किककीय-देय-प्रणाल्यां वैश्विक-स्तरे स्थापयितुं आर्.बी.आई. इत्यस्य प्रयत्नानां प्रशंसाम् अकरोत्।
- केन्द्रीयः गृहमन्त्री अमितशाहः अकथयत् यत् प्रशासनं नक्सल्-मुक्तभारतस्य निर्माणदिशि बृहद्-पदक्षेपम् उत्थापयति; वामपन्थ्युग्रवादेन सर्वाधिकप्रभावितानां जनपदानां सङ्ख्या द्वादशतः अपचीय षड् यावत् जाता।
- भारतेन भूकम्पप्रभाविताय म्यान्मार-देशाय मानवीयसहायता प्रवर्धिता; सी-130 जे इत्येतत् विमानं समेत्य भारतीय-नौसेनायाः त्रय: अपि जलपोता: साहाय्यसामग्रीभिः सह प्रस्थिता:।
- आई.पी.एल्. विंशति-प्रतिविंशति: क्रिकेट्-क्रीडायां लखनऊ-सुपर्-जायण्ट्स्-दलम् अद्य सायङ्काले लखनऊ-नगरे पञ्जाब-किङ्ग्स्-दलं सम्मुखीकरिष्यति।

## अथ वार्ताः विस्तरेण

### चिली-राष्ट्रपतियात्रा

अद्य भारत-चिलीदेशौ आपत्प्रबन्धनाय सांस्कृतिक-विनिमयाय च सहमतिं प्रकटितवन्तौ। उभयपक्षाभ्यां अण्टार्कटिका-सहयोगमादाय आशय-पत्रस्यापि परस्परम् आदान-प्रदानं कृतम्। प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां चिलीदेशस्य राष्ट्रपतिना गैब्रियल बोरिक फॉन्ट इत्यमुना सह संवादं साधितवान् , यत्र भारत-चिलीदेशयोः सम्बन्धमाश्रित्य विविधपक्षेषु चर्चा समभवत्। श्रीमोदिना अतिथिगणमान्यस्य सम्मानार्थं मध्याह्न-भोजनस्यापि आयोजनं कृतम्।

वार्ताहरैस्सह संवादक्रमे श्रीमोदिना प्रोक्तं यत् चिलीदेशः लैटिन-अमेरिकायां भारतस्य महत्वपूर्णः सहयोगी-देशः वर्तते। तेन प्रोक्तं यत् अद्यतन-चर्चायाम् आगामिषु दशकेषु सहयोगवर्द्धनार्थं नूतनयोजनाः अन्वीक्षिताः। प्रधानमन्त्रिणा उक्तं यत् उभयपक्षाभ्यां स्वीयदलानि व्यापकार्थिक-सहभागितायै चर्चार्थं निर्दिष्टानि सन्ति।

तेन प्रोदीरितं यत् महत्वपूर्ण-खनिजक्षेत्रे सहभागितायै विशेषबलं प्रदास्यते। श्रीमोदिना कथितं यत् भारतम् आङ्किकीय-सार्वजनिक-अवसंरचना-क्षेत्रे, नवीकरणीयोर्जा-रेलवे-अन्तरिक्षादिषु क्षेत्रेषु च चिलिदेशाय स्वानुभवान् प्रदातुं कटिबद्धमस्ति। प्रधानमन्त्रिणा कथितं यत् भारतदेशः चिलीदेशं अण्टार्कटिकायाः प्रवेशद्वारत्वेन पश्यति।

### वक्फ-रिजिजूः

पञ्चविंशत्यधिक-द्विसहस्रतमं वक्फ-संशोधन-विधेयकं श्वः लोकसभायां विचारार्थम् अनुमोदनार्थञ्च समायास्यति। संसदीय-कार्यमन्त्री किरेन रिजिजू इत्येषः अद्य संसदभवने वार्ताहरैस्सह संवादक्रमे प्रोक्तवान् यत् सदने विधेयकोपरि अष्टहोरां यावत् चर्चा भविष्यतीति

निर्णयो सञ्जातः। तेनोदीरितं यत् कार्यमन्त्रणा-समित्युपवेशने अयं निर्णयो जातः यत् सदनस्य भावनामवलोक्य चर्चायाः समयः सम्वर्धेत। तेन प्रोक्तं यत् प्रशासनं विधेयक-सम्बद्धानां समेषामपि प्रश्नानाम् उत्तरप्रदानार्थं सन्नद्धमस्ति। मन्त्रिणा आरोपितं यत् विपक्षिणः तुष्टिकरणस्य राजनीतिकारणात् अस्य विधेयकस्य विरोधे सन्ति। इतः प्राक् विभिन्न-प्रकरणेषु विपक्षस्य विरोधकारणात् लोकसभा मध्याह्न-द्विवादनं यावत् स्थगितासीत्। शून्यकालावधौ समाजवादी-पार्टीति दलस्य नेतुः राणा-साङ्गा इत्यस्योपरि कथित-वक्तव्यानन्तरं समाजवादीपार्टीति दलस्य नेतारः रामजी-लाल-सुमनोपरि कथितप्रहारस्य प्रकरणोत्थापनार्थं प्रयासरताः आसन्। अपरत्र काङ्ग्रेस-टीएमसीसांसदाः डुप्लीकेट-इलेक्टोरल इति प्रमाणसंख्यासम्बद्ध-

प्रकरणान्यादाय सदने कोलाहलरताः आसन्। अध्यक्षेण ओमबिरला इत्यमुना विपक्षीसदस्यैः विभिन्नप्रकरणेषु प्रदत्तस्य स्थगनपत्रस्य निराकरणं कृतम् सहैव तेन सबलं प्रोक्तं यत् सदनं नियमानुसारेण प्रचलिष्यति।

<u>राष्ट्रपति-आरबीआई</u>

राष्ट्रपतिः द्रौपदी मुर्मुः प्रोक्तवती यत् भारतीय-रिज़र्व-बैङ्केन वित्त-प्रदेय-संरचनायाः आधुनिकीकरणं विधाय आङ्किकीय-देय-प्रणाल्यां महत्त्वपूर्णभूमिका समाविष्कृता। अद्य मुम्बईय्यां भारतीय-रिज़र्व-बैङ्कस्य नवतिवर्ष-सम्पूर्त्ति-समारोहे प्रवदन्त्या द्रौपदी मुर्मुः इत्यनया प्रकाशितं यत् विगतेषु नवदशकेषु केन्द्रीय-वित्तालयस्य यात्रा प्रशासनस्य नित्यनुरुपमेव सञ्जाता।

तया सबलं प्रतिपादितं यत् यथा भारतदेशः स्वतन्त्र-शताब्द्याभिमुखं गच्छति तथैव सप्तचत्त्वारिंशदधिक-द्विसहस्रतमस्य विकसित-भारताभियानं तादृशस्य वित्तीय-पारिस्थितिकी-तन्त्रस्य अपेक्षां करोति, यत् अभिनवम्, अनुकूलं सर्वसुलभञ्च स्यात्।

विरामः

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.com इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।

अमित शाह

केन्द्रीयगृहमन्त्रीः अमितशाहः अवदत् यत् प्रशासनं नक्सल्-मुक्तभारतस्य निर्माणदिशि बृहत्-पदक्षेपम् उत्थापयति। सामाजिक-सञ्चार-पटले एकस्मिन् सन्देशे श्रीशाहः अवदत् यत् वामपन्थ्युग्रवादेन सर्वाधिक-प्रभावितानां जनपदानां सङ्ख्या द्वादशतः न्यूनीकृत्य षट् यावत् कृत्वा राष्ट्रं नूतनं लक्ष्यम् अवाप्नोत् इति। गृहमन्त्रिणा बलं प्रदत्तं यत् प्रशासनं सर्वव्यापि-विकासं सुनिश्चितं कुर्वन् नक्सलवादं प्रति दृढ-दृष्ट्या सह सशक्तं, सुरक्षितं, समृद्धं च भारतं निर्माति। गृहमन्त्री एतदपि उक्तवान् यत् भारतं षड्विंशत्यधिक-द्विसहस्रतम-वर्षस्य मार्चमासस्य एकत्रिंशत्-दिनाङ्कपर्यन्तं नक्सलवादं पूर्णतया उन्मूलयितुं प्रतिबद्धम् अस्ति इति।

विदेशमन्त्री

विदेश-कार्यमन्त्री डॉ. एस्. जयशङ्करः अवदत् यत् ऑपरेशन-ब्रह्मा इत्यस्य अन्तर्गतं भारतीय-वायुसेनया निर्मितं सी-130 जे इत्येतत् विमानं षोडश-टनमिता आवश्यक-मानवीय-सहायता, तण्डुलानि आवश्यक-खाद्य-वस्तूनि च वहन् अद्य प्रातः दिल्लीतः माण्डले-नगरं प्रति प्रस्थितम्। तेनोक्तं यत् भारतीय-नौसेनायाः आई.एन्.एस्. घरियाल् इति पोतः द्विचत्वारिंशदधिक-चतुश्शत-मीट्रिक टनमितैः आवश्यक-खाद्यपदार्थैः सह विशाखापत्तनम-नगरात् प्रस्थितः। डॉ. जयशङ्करः अवदत् यत् माण्डले-नगरे भारतीयसेनायाः क्षेत्र-चिकित्सालय-विभागः कार्यान्वितः अस्ति इति। एतदतिरिच्य म्यान्मार-देशे गतसप्ताहे सप्त दशांशोत्तर सप्त तीव्रतायुतेन भूकम्पेन मृतानां सङ्ख्या समभिवर्ध्य नवदशाधिक-सप्तशतोत्तर-द्विसहस्रं यावत् सञ्जाता अथ च एकां वाहिनीं सम्बोधयन् सैन्यनेता मिन आङ्ग ह्लाइङ्ग उक्तवान् यत् इयं सङ्ख्या त्रिसहस्राधिका भविष्यति इति सम्भाव्यते। न्यूनातिन्यूनं एकविंशत्यधिक-

पञ्चशताधिक-चतुस्सहस्र-जनाः व्रणिताः तथा च एकचत्वारिंशदधिक-चतुश्शतजनाः अधुनापि लुप्ताः सन्ति। थाईलैण्डदेशे अनेन प्रचण्ड-भूकम्पेन न्यूनातिन्यूनं विंशतिजनाः मृताः। भारतीय-नौसेनायाः आई.एन्.एस्. करमुख, आई.एन्.एस्. घरियाल्, एल्.सी.यू.-एस्.2 इत्येते त्रयः पोताः पञ्चशत-टनमिताधिकाभिः अतिरिक्त-सहायक-सामग्रीभिः सह याङ्गून-नगरं प्रति गच्छन्तः सन्ति।

<u>आईपीएल</u>

आई.पी.एल. विंशति-प्रतिविंशति-क्रिकेट्-क्रीडायां, लखनऊ-सुपर-जायण्ट्स इत्येतत् दलं लखनऊ-नगरस्य एकाना-क्रिकेट्-क्रीडाङ्गणे पञ्जाब-किङ्ग्स इत्येतत् दलं सम्मुखीकरिष्यति। इयं स्पर्धा सायं सार्धसप्तवादने प्रारप्स्यते। लखनऊदलं तृतीये स्थाने अथ च पञ्जाबदलं पञ्चमे स्थाने स्तः। लखनऊदलेन स्वीयान्तिम-स्पर्धा सनराइजर्स-हैदराबादं विरुध्य पञ्च-स्तोभैः विजिता। पञ्जाब-दलेन गुजरात-टाइटन्स-दलं एकादश धावनाङ्कैः पराजितम्। मुम्बईनगरस्य वानखेड़े-क्रीडाङ्गणे मुम्बई-इण्डियन्स-दलेन कोलकाता-नाइट-राइडर्स-दलम् अष्टस्तोभैः पराजितम्।

।। इति वार्ता: ।।